॥वे॰त॥ भवात्। कथं द्वैतदर्शनं तत्त्वतोपदेशाः। अथ च विज्ञापितो मोहमहांध
॥३॥ कारोयं आश्रितो मे तत्त्वसंनिधानात्। विनावसो किंतु समीपगस्य शी
तं तमोभिप्रभवं स्वजाद्य इतिवादिनः। उद्भवस्य स्वतत्त्वज्ञानस्फुर्त्तिप्रका
१ शानवेलायां वाधितानुवृत्तिश्च संभवे। नमोस्तु ते महायोगिन् प्रपन्नम
नुशाधि मां। यथा त्वच्चरणांभोजे रतिस्यादनपायिनीति भेददर्शनमू
प लनिज्ञा[illegible]नं कथं संभवति। रज्जुसाक्षात्कारदशायां सर्पभ्रमानुपप
त्तिवत्। उपदेशप्रभानतत्त्वज्ञानानुसंधानेनाद्वितीयात्मसाक्षात्का
रे सति वाधितानुवृत्त्यनुपपत्त्याउपदेशानुपपत्तिः। तदवस्थात थाच
भगवदुपदिष्टतत्त्वज्ञानावधारणानंतरं। नष्टो मोहः स्मृतिर्लब्धे
त्यादिना तत्त्वसाक्षात्काराविष्कारदशायां वाधितानुवृत्तसंभवात्। ॥२॥
तदभ्रमादाद स्मिस्थितोस्मि गतसंदेहः। द्योधनादीन्प्रतिउद्ध

भ्रान्तिभिः।कथंनविचारणीयः।अथचेत्त्वत्सिद्धांतनिष्ठैरपिस्वस्वगुरुषै
वियेमायाकल्पितइत्येवंवक्तव्यत्वे।गुरुरेवयंब्रह्मस्वरूपेवपरागतिः।स रं
हिविद्यातस्तंजनयती।तदुक्तंजन्मनस्मैनदुह्येतकदाचन।आचार्यमांविजा
नीयादित्यादिश्रुतिस्मृतिविरोधः।कथंनपरामर्षनीयः।नन्वज्ञानादशा
यामुपदेशादयः।सत्याएवजातेतुज्ञानेयत्रत्वस्यसर्वमात्मैवाभूत्तत्के
नकंपश्येदित्यादिश्रुतेर्नद्वैतदर्शनमितिचेत्।तर्हिश्रुद्धितीयात्मसाक्षा
त्कारात्छिन्नष्टभूताज्ञानंतत्कार्यस्यकथंद्वैतदर्शनपूर्वंन्तमुपदेशादिप +त
रत्वंवाधितानुवृत्त्याइतिचेत्।सम्यक्ज्ञानप्रवृत्तिवेलायांवाधितानुवृत्तिः
तिष्टतिनवातिष्टतिचेत्।ज्ञानेनतुतदज्ञानमित्यादिप्रमाणविरोधः।त्व
नुभवविरोधश्चरज्जुसाक्षात्कारदशायांसर्वभ्रमभ्रमानुपलंभात्।नति
ष्टतिचेत्।उपदेशसमयेसम्यक्ज्ञानप्रवृत्तत्वेनवाधितानुवृत्त्यसं

॥वे॰त॰॥ नं । मिथ्यात्वेनापि न संभवति न हि शुक्तितयाज्ञातो भासमानायां तत्र र
॥४॥ जतावभासोपपत्तिः । तथा नभ्युपगमे सविश्वकृद्विश्वविदात्मयोनिःज्ञ
कालकालो गुणी सर्वविद्यः । तेषामेवानुकंपार्थमित्यादिश्रुतिस्मृतिविरो
धः किंच यथा चंद्रैकत्वे ज्ञायमानेपि द्विचंद्रदर्शनमविद्यैव । अपोपरम
त्वात्सुषुप्तिः । अत एव स्थूलसूक्ष्मप्रपंचलयस्थानमिति चोच्यते यथा
वनस्य व्यष्ट्यभिप्रायेण वृक्षाः । इत्यनेकत्वव्यपदेशः । तथाज्ञानस्य सम
2 ष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः । इंद्रो मायाभिः पुरुरूप ईयते इयं व्य
ष्टिर्निकृष्टोपाधितया च दोषमंतरेण न स्यात् । न चेश्वरस्य मिथ्यात्वे
नापि द्वैतदर्शनमविद्यैव दोषं विना न संभवति दोषाभ्युपगमे तु शु
द्धमहाविभूतिरिसुक्तो व्याप्तिस्यामर्हति यतः । नियंतृत्वेन व्याप्तिर्विवक्षि
ता । शुद्धमहाविभूत्याख्ये परे ब्रह्मणि कथ्यते मैत्रेय भगवच्छब्दः सर्वे ॥४॥

विषयं तववचनं करिष्ये। इति द्वैतदर्शनमूलमर्जुनवाक्यं कथं संगच्छते
किंच परमार्थदोषमूलकैः रज्जुसर्पादिदृष्टान्तैः। अपरमार्थदोषमूले
यं वाधितानुवृत्तिः। ईश्वरस्यापि यत्कथंचिदुच्यते। तत्क्षेत्रज्ञस्यैवोच्यता
मादावज्ञानत्वं पश्चादनुरूपदेशादिभिरधिगतज्ञानत्वं तेषां एव संभवति
ईश्वरस्य तु यः सर्वज्ञः सर्ववित् स्वाभाविकी ज्ञानवलक्रिया च यो वेत्ति यु
गपत्सर्वं प्रत्यक्षेण सदा स्वतः इत्यादिश्रुतिविरोधात्। कथंचिदपि वक्तुं न
शक्यते। कथं तर्हि तस्य द्वैतदर्शनं उपदेशादिव्यवहारश्चेति निरूपणीयं
ननु मिथ्याभूतस्य मिथ्यात्वेन दर्शनं न सम्यक्ज्ञानविरोधि इति चेत्। यदी
श्वरः मिथ्यात्वेनैव स्वव्यतिरिक्तं जानाति न तर्हि तन्निग्रहानुग्रहादिप्र
वर्त्तते न ह्युन्मत्तो मिथ्यात्वेन ज्ञातानुद्दिश्य किमपि करोति किंचेश्वर
स्यायावद्विद्याविरोधिब्रह्मस्वरूपावभासे ब्रह्मविवर्त्तभूतेऽयं द्वैतदर्श

॥वे॰त॰॥ संबंधः। आगंतुकः उत स्वाभाविकः। आगंतुकेतु विभुत्वं ब्रह्मणो न स्यात्
॥५॥ श स्वाभाविकश्चेत्। अग्रेपि मायाशबलमेव ब्रह्म अतश्च सर्वदा विशिष्टमे
वेति सिद्धं। एवं च सति कथं विजातीयः शून्यः शबलत्वेप्यग्रे प्रपंचाप्रतीते श
किं कारणमिति क्षणाभावादप्रतीतिरिति चेत्। तदभावे किं कारणं इच्छैवेति
चेत्। किमग्रेपीच्छावद्ब्रह्म तर्हि सर्वदा सविशेषेणैवेति सिद्धं किं चांगीकार
णात्पूर्वं कमाश्रिता मायाब्रह्माश्रितेति चेत् सर्वदा वैशिष्ट्यप्रसंगः। अद्वैतहा
उ निश्च ननु मायायाः। अपरमार्थत्वान्नोक्तदोषप्रसंग इति चेत्। अपरमार्थश
ब्देन किं विवक्षितं रज्जुसर्पवन्मिथ्यात्वं। अथ विकाराद्यवच्छिन्नत्वेन ब्रह्मसमा वा
नसत्ताकाभावत्वं न चाद्य। अज्ञानं त्रिगुणात्मकं ज्ञानविरोधिभावरूपेति
स्वसंप्रदायवचनेन विरोधः। अथ मयाध्यक्षेण प्रकृतिः सूयते सचराच ॥५॥
रमिमुत्पाद्य कार्योत्पत्तिः कारणाभावेन स्यात्। असतः परोक्षस्यनु कूल

कारणकारणे समस्तहेयरहितं कृत्स्नाख्यं परमं पदं परः पराणां सकलान
यत्र क्लेशादयो संति परावरेशो इत्यादि निस्तनिर्दोषप्रतिपादकशास्त्रवि
रोधः। तस्माद्यथा तिमिरादिदोषरहितस्य द्विचंद्रदर्शनं मिथ्यात्वेनापि न सं
भवति। तथा समस्तहेयप्रत्यनीकस्य ईश्वरस्यापि मिथ्यात्वेनापि द्वैतदर्श
नं न संभाव्यं किंच नीलपृष्ठत्वाद्याकारेणानुभूयमानायां शुक्तौ मिथ्यात्वेना
पि न रजतप्रतीतिः। तदुपादानाद्यर्थे प्रवृत्त्याद्यनुत्पत्तानाय द्विदृश्येत। त
दा ईश्वरस्यापि सर्वदापरोक्षेण ध्यानं दात्मसाक्षात्कारे मिथ्यात्वेन द्वै
तदर्शनं तन्मूलोपदेशादिव्यवहाराश्चोपपद्येरन्। किंच रज्जौ सर्पवत्।
निर्विशेषज्ञानमात्रे ब्रह्मणि आरोपितस्य प्रपंचस्य दृष्टान्नान्योतोस्ति द्र को
ष्टेति श्रुतेः। ब्रह्मैव दृष्टेति चेत्। ज्ञानमात्रस्वरूपस्य कथं दृष्टृत्वं वाङ्मनसं तरे
ण भ्रमभूतस्य प्रपंचस्य दृष्टा मायायोगेनेति चेत्। किमयं योगः। अथवा

॥वे॰त॥
॥६॥

अस्यावयवसंभूतैस्तुव्याप्तंसर्वमिदंजगत्। अक्षरात्परतःपरः ममयोनि
र्महद्ब्रह्ममममायाद्दुरत्यया। प्रकृतिंपुरुषंचैवविद्ध्यनादीउभावपीत्यादि
श्रुतिस्मृतिविरोधाच्चन्हिमिथ्याभूतंवस्त्वक्षरत्वध्रुवत्वादिभिपरवाक्यै
रुपदिश्यते। द्वितीयस्तुपक्षःप्रकृतेःब्रह्मसमानसत्ताकाभावोभ्युपगम
श्चाविकारजननीमज्ञांसततविक्रियेत्यादिभिरस्याःविकारत्वेनसतत स
परिणामित्वेनचैकरूपाभावान्नब्रह्मसमानसत्ताकत्वं। अतएवेयमन
4 न्तादिपदैरुपचर्यते। तत्कार्याणामपिनित्यत्वेनाविर्भावतिरोभावधर्म
कत्वसाम्यात्। स्वप्नप्रपंचमृगतृष्णादिवदसन्मिथ्यादिपदैरुपचारतः
व्यपदिश्यन्तेवैराग्यजननार्थंयच्चोपलभ्यमानत्वविनाशित्वाभ्यांसद
सदनिर्वचनीयत्वेनकार्यस्यमृषात्वमितिसदसतउपलब्धिविना
योगाद्धिनमिथ्यात्वंसाधयतिकिंत्वनित्यत्वंयद्देशकालसंबंधतयाउप ॥६॥

शक्तिमत्त्वरूपकारणत्वासंभवात्॥ ननुकार्यस्याप्यसत्त्वेनैषदोषः। स्वा
प्नशिरःछेदनकार्यंप्रतिस्वाप्नचौरस्यकारणत्वंदृश्यते। इतिचेन्नवैधर्म्या
च्चनस्वप्नादिवदिति सूत्रेस्वप्नजाग्रतयोर्वैधर्म्यात्। जाग्रतप्रस्पयानांस्व
[illegible] । प्र
म्नः [illegible]
स्यप्रसादृश्यप्रतिषेधात्। तथासत्त्वाचापरस्येतिसूत्रे यथाचकारणं
ब्रह्मत्रिषुकालेषुसत्त्वंनव्यभिचरति। तथाकार्यमपिजगत्रिषुकालेषुस
त्त्वंनव्यभिचरति। इतिकार्यस्यस्यसत्प्रतिपादनात्। अन्यथाअसत्यम
प्रतिष्ठंतेजगदाहुरनीश्वरमित्यासुरसिद्धांतप्रसंगात्। गौरनाद्यंतव
तीसाजनयित्रीभूतभाविनीविकारजननीमज्ञामष्टरूपांभूमिरापोन
लोवायुः इतिअजांध्रुवां अस्मान्मायीसृजतेविश्वमेतत्तस्मिंश्चान्योमा
ययासन्निरुद्धः। अजामेकांमायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरं।

॥ वे. त. ॥ प्रायः । तथा हि इदं विभक्तनामरूपवत्त्वावस्थं जगदग्रे सृष्टेः । प्राक्
॥ ८ ॥ क्षेमे वा विभक्तनामरूपकार्यतया एकत्वावस्थापनमेव । अद्वितीयमधिष्ठा
नांतरशून्यं च सदेवासीदित्यर्थः मूलमानाधारमित्यादिभिरैकार्थ्यात्
सच्छब्दो विशेष्यभूतपरमात्मवाचकोपि कारणविषयत्वसामर्थ्यात्
कारणत्वापयिकगुणविशिष्टप्रकृतिकालशरीरकं परमात्मानमुप
5 स्थापयति । तथा अत्र सदेवे[illegible]वकारेण नैयायिकाभिमतमुपपत्ते प्रा त्ये
क् जगतोसत्त्वं व्यावर्त्यते । एकमेवेत्येवकारेण बहुस्यामितिलक्ष्यमाण
कार्यबहुत्वावस्थामुदस्यंते सर्वासां कारणवादिनीनां श्रुतीनामैक्यवा
क्यभावापकत्वात् । तत्र विष्णुस्तथासीद्धरिरेव निष्कलः । एकोह वै नारा
यण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्नि ॥ ८ ॥
र्न सोमो न सूर्यः स एकाकी न रमेत तस्य ध्यानांतःस्थस्यैकाकन्यादशेन्द्रि

लभ्यतेऽनुपलभ्यतिचतेषामनित्यत्वंप्रबलवाक्यैः।अनात्मीपरमार्थश्च
प्राज्ञैरभ्युपगम्यते।तन्तुनाशिनसंदेहोनाशिद्वयोपपादितं।यत्तुकालां
तरेणापिनान्यसंज्ञामुपैतिवेपरिणामादिसंभूतात्तद्वस्तुनरूपतत्त्वं किं।अं
त वंतइमेदेहाअविनाशितुतद्विद्धिः।आद्यंतवंतकौंत्तेयनतेषुआ
गमापायिनोनित्याः।अनित्यमसुखंलोकं।एकादशो।प्रत्यक्षेणानुमानेन
निगमेनात्मसंविदा।आद्यंतवदसज्ज्ञात्वानिःसंगोविचरेदिह।तदेतदक्ष
यंनित्यंजगत्।तएवनित्यानित्येनासतोविद्यतेस्मत्रसत्त्वासत्त्वव्यपदेश
हेतु।अन्यथापूर्वापरविरोधः प्रत्यक्षादिविरोधश्चप्रत्यक्षंप्रपंचसज्ञा
वग्राहकंइतिसूत्रकारोप्याह नाभावरूपलब्धेः।नचैकमेवाद्वितीयं
ब्रह्मेतिश्रुतिःस्फुटतयाद्वितीयत्वंब्रह्मणोवदतिकथंतर्हिवस्त्वंतर
सद्भावेतत्सिद्धिः।उच्यतेवस्त्वंतरविशिष्टस्यैवाद्वितीयत्वंश्रुत्यभि

॥श्वे॰त॰॥ तं।मयिसर्वंप्रतिष्ठितं॥मयिसर्वंलयंयातितद्ब्रह्माद्वयमस्म्यहं।श्वेता
॥८॥ श्वतरोपनिषदिएवंमंत्राभिमानिभिर्देवैरपिसूक्ष्मचिदचिद्विशिष्ट
स्यैवपरमात्मनः।परमकारणत्वंनिर्णीतं।ॐब्रह्मवादिनोवदंतिकिंका
रणंब्रह्मकुतस्मजाताजीवामकेनक्वचसंप्रतिष्ठाः।अधिष्ठिताकेन
6 सुखेतरेषुवर्त्तामहेब्रह्मविदांव्यवस्थां।कालःस्वभावोनिय
तिर्यदृच्छाभूतानियोनिः।पुरुषेतिचिंत्यंसंयोगएषांनत्वात्मभावादा
त्माप्यनीशः।सुखदुःखहेतोः।तेध्यानयोगानुगताअपश्यन्देवात्म
शक्तिंस्वगुणैर्निगूढांयःकारणानिनिखिलानितानिकालात्मयुक्तान्यधि
तिष्ठत्येकः।वेदांतसूत्रकारोपिस्वयोगमहिम्नाइदमेवनिश्चितमि ॥८॥
त्याह।श्रीमद्भागवते।भक्तियोगेनमनसिसम्यक्प्रणिहितेमले

याणीत्यारंभमुपालोपनिषदि। तदासीन्नैवेह किंचनाग्रआसीन्मूल
मानाधारइमाःप्रजाःप्रजायंते। द्वितीयोदेवएकोनारायणइत्याद्यनुसा
रात्। तद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यांव्याक्रियतेतिनामरूपव्या
करणमात्रश्रवणाच्च। अयमेवश्रुत्यर्थः अन्यथापरस्परव्याघातप्रसं
गात्। उपदिष्टंचैतन्नश्रुत्यभिप्रायं भगवताएकादशे। एकोनारायणोदे
वपूर्वसृष्टंस्वमायया संहृत्यकालकलयाकल्पांतइदमीश्वरएकए
वाद्वितीयोभूदात्माधारोखिलाश्रयः। कालेनात्मानुभावेनसाम्यंनी
तासुशक्तिषु। सत्वादिष्वादिपुरुषःप्रधानपुरुषेश्वरः। परावराणांपर
मआस्तेकैवल्यसंज्ञितः। इत्यत्राखिलाश्रयस्यसेवाद्वितीयत्वनिर्देशे
नविशिष्टस्यैवाद्वितीयत्वस्फुटतयासिद्धं वाराहेच। मत्स्येवसकलंजा

एवमकल्पयदितिस्वाभिप्रायं। अथ च तदानीं जीवानां तत्तत्कर्मप्रवाहा
नां चाभावात्। देवादिविषमसृष्टेः किंकारणमितिनिरूपणीयं। ईश्वरेच्छैवे
ति चेन्न साधुकारी साधुर्भवति। इत्यादिश्रुतिविरोधात्। वैषम्यनैर्घृण्यदोष
प्रसंगाच्च। ननु प्रपंचस्य मिथ्यात्वेन न वैषम्यादिदोषप्रसंग इति चेन्न प्रपं
चमिथ्यात्ववादः। यथोर्णनाभिः सृजते गृह्यते चेत्यादिश्रुतिविरोधः। दोषप
रिहारार्थं वैषम्यनैर्घृण्ये न सापेक्षत्वात्। इति सूत्रनिर्माणवैयर्थ्यं च स्यात्।
विवर्तवादे ननु सन्मात्राध्यस्तप्रपंचस्य कः द्रष्टा ब्रह्मैवानाद्यविद्यातिरोहि
तस्वरूपं स्वगतनानात्वं पश्यतीति चेन्न निसमुक्तेञ्च एवं ह्येकरसः। प्रकाशज्ञा
नमात्रस्वरूपस्य स्वनिरंशस्य तिरोधानासंभवात्। प्रकाशपर्यायस्य ज्ञानस्य
तिरोधाने स्वरूपनाशप्रसंगः। तिरोधानं नाम वस्तुस्वरूपे विद्यमाने तत्प्र ॥९॥
काशनिवृत्तिः। प्रकाश एव वस्तुस्वरूपमित्यङ्गीकारे तिरोधानाभावः स्व

अपरस्य पुरुषं पूर्णं मायां च तदुपाश्रया । यया संमोहितो जीव आत्मानं
त्रिगुणात्मकं । परोपि मनुतेनर्थं तत्कृतं चाभिपद्यते । अनर्थोपशमं सा
क्षाद्भक्तियोगमधोक्षजे । लोकस्याजानतो व्यासश्चक्रे सात्वतसंहितां । दि
च । अत्र इदमनेन यद्विप्रलयकालो विवक्षितः तदा तु अक्षरं तमसि लीय
ते तमः परे देव एकीभवति । प्रकृतिर्योगमायाख्यातात्मकाव्यक्तस्वरूपिणी
पुरुषश्चाप्युभावेतौ ब्रह्मणि लीयते । भारते च । ब्रह्मादिषु प्रलीनेषु नष्टे लो
के चराचरे । आभूतसंप्लवे प्राप्ते प्रलीने प्रकृतौ महान् । एकस्तिष्ठति सर्वात्मा
स तु नारायणः प्रभुः । इत्याद्यनेकप्रमाणैः । तदानीं सूक्ष्मचिदचिद्विशिष्टत्वं
ब्रह्मणः सिद्धत्वात् विशिष्टस्यैवाद्वितीयत्वं सिद्धं । यदा तु यस्तूर्वं कदाचिद
पि न सृष्टिसद्भावः तत्कालोग्रशावार्थः । तदा तु सूक्ष्मचेदमसौ धानारायणा

त्मा च सर्वेषामाधारः पुरुषोत्तमः विष्णुनामा स देव ५

॥वे.त.॥ ब्रह्म सर्वशरीरेषु जीवमनुभवतीति चेत् । पादे मे वेदना शिरसि मे सुखमि
॥१०॥ तिवत् । सर्वशरीरेषु सुखदुःखप्रतिसंधानं स्यात् । जीवेश्वरबद्धमुक्तशि
ष्याचार्यज्ञत्वादिव्यवस्था च न स्यात् । सौभरिप्रभृतिषु ह्यात्मैकत्वेनैकश
रीरप्रयुक्तसुखादिप्रतिसंधानमेकस्य दृश्यते । न चाहमर्थस्य ज्ञातृत्वाज्ञेदा
त्प्रतिसंधानाभावो नात्मभेदादिति वक्तुं शक्यं । आत्मा ज्ञातैव चासेहमर्थ
8 एव नत्वंतःकरणभूतस्त्वहंकारो जडत्वात् । करणत्वाच्च शरीरेंद्रियादि
वन्नानाविकारजननीमज्ञां एतद्यो वेत्ति न हि । विज्ञातुर्विज्ञातेर्विपरिलो
पो विद्यते नान्योतोस्ति द्रष्टेति ज्ञानस्यैवायं पुरुषः । विज्ञातारमरे केन वि
जानीयात् । मोक्षधर्मे च । अबुध्यमानां प्रकृतिं बुध्यते पंचविंशकः । न तु बु ॥१०॥
ध्य[illegible]तीति धर्मप्रकृतिं पंचविंशकं । किंच । अन्यत्र सत एवान्यत्रारोपनिय
मात् । निरविषाणादेरिव स्वरूपेण सतः प्रपंचस्य न[illegible]रोपसंभवः

रूपनाशो वा स्यात् । न च वाच्यं स्वरूपप्रकाशस्य निसत्त्वेपि तद्विशिष्टमात्र
मविद्यातिरोहितमिति विशिष्टस्य स्वरूपानतिरिक्तत्वे प्रागुक्तदोषस्य त
स ३ दवस्थत्वात् । अतिरिक्तत्वे विशेषत्वप्रसंगात् । न च निर्विशेषप्रकाशज्ञा
नमात्रस्याज्ञानसाक्षित्वमहंकारादिजगद्भ्रमश्चोपपद्यते । साक्षित्वभ्रमा
द्यो पि हि ज्ञातृविशेषगताः दृष्टानज्ञप्तिमात्रगताः किंच यदि ब्रह्मैवाना
द्यविद्यावशात्स्वगतनानात्वं पश्यति । तर्हि प्रलयकाले विद्यमानेप्यज्ञाने
प्रपंचादर्शने किंकारणं किंच । ब्रह्माज्ञानपक्षे स्वाज्ञाननिवृत्त्यात्तस्यैव मोक्ष
मानत्वात् । तदविद्याकल्पितानां जीवानां मोक्षार्थश्रवणादिप्रयत्नो निष्फलः
अविद्याकार्यत्वात् स्वाप्नभुभुक्षूणां प्रयत्नवत् । शुक्तिकारजतादिषु रजता
११ धस्व द्युपादानादिप्रयत्नवत् । मोक्षार्थप्रयत्नोपी स्यर्थः । कल्पिताचार्यायत्त
ज्ञानकार्यत्वात् । शुकप्रह्लादवामदेवादिप्रयत्नवत् । किंच एकमेव

कारणमात्रमिथ्यात्वपक्षे कार्यप्रतिवर्त्तनानुपपत्तेः न चैवं स्व
स तोपि सर्पादेर्ज्ञानकारणत्वोपपत्तिवत् २

॥वे.त.॥ तद्धि विषयज्ञानस्यैव भयादिकार्यहेतुत्वेन विषयस्य तद्धेतुत्वाभावात्
॥११॥ भयकारणत्वोपपत्तिवत्तु भयकारणत्वोपपत्तिरपि किं न स्यादिति चेन्न
दोषस्यैवासदर्थावलंबनज्ञानकारणत्वेन भ्रमस्थले विषयस्य ज्ञानका
रणत्वानुपपत्तेः ननु घटपटादीनां व्यावहारिकस्य सत्त्वमंगीकृतमेवेति
चेन्न। स्वरूपतो मिथ्याभूतस्य शुक्तिरजतस्य व्यवहारार्हत्वासंभवात्
नन्वसतोपि स्वाप्नपदार्थस्य स्वकालावच्छिन्नव्यवहारोपयोगित्वं दृश्य
९ ते इति चेन्न हि प्रातिभासिकव्यावहारिकसांकर्यप्रसंगः। किंच रज्ज्वाम
ध्यस्तानां सर्पभूतलांबुधारादीनामसत्त्वे यद्विकिमपि भेदो वक्तुं श
क्यते। तदा सन्मात्रेऽध्यस्तानामपि त्रयं व्यावहारिकसत्ताकः। त्र
यं च प्रातिभासिकसत्ताकः। इत्येवं भेदद्वयमतां॥ अवच्छेदवादे यथा ॥१९॥
वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः। तथा नानात्वेन

२ दृश्यते हिरज्ज्वादिषु सतएव सर्पादेरारोपः नीलंनभइत्यत्रापिपूर्वमनु
भूतस्यसतएवनीलस्यप्रतीतिः। स्वप्नेति। अद्यजन्मनिजन्मांतरेवादृष्टस
श्रुतस्यक्वाविषयस्यानुभवः। अदृष्टादज्ञात्वाज्ञानान्नभावउपजायतेइ
त्येकादशेभगवद्वचनात्। नन्वारोपःस्वविषयस्यक्वचित्प्रतीतिमात्रमपेक्ष
तेनसत्त्वमपि। इतिचेन्नप्रतीतेरप्यसतः। शशशृंगादेरिवासंभवात्। ननु
रज्जुसर्पप्रतीतेरिवप्रपंचप्रतीतेरपिदोषमात्रमेवकारणमपेक्षितमि
तिविषयसद्भावोनापेक्षितः। इतिचेन्नदोषरूपकारणस्यापिमिथ्यात्वेनप
रपक्षविषयप्रतीतिरूपकार्योत्पत्तेरसंभावात्। कार्यस्यकारणसत्तापेक्ष
त्वनियमात्। नन्वसतोप्यारोपितसर्पस्यभयादिकार्यंप्रतिकारणत्वदर्श
नात्कार्यस्यकारणसत्तापेक्षितत्वनियमोनास्तीतिचेन्न। असतःपरो
स्यस्यानु[illegible]वाकिंस[illegible]तरूपकारणत्वासंभवात्। भ्रमस्थलेप्यारोपि

हितयोरीश्वरप्राज्ञयोरपिवनवृक्षावच्छिन्नाकाशयोरीवाभेदः।वनतद
वच्छिन्नाकाशयोराधारानुपहिताकाशवत्।अनयोरज्ञानतदुपहि
तचैतन्ययोराधारभूतंयदनुपहितंचैतन्यंततुरीयमित्तिचोच्यते।शिव
मद्वैतंचतुर्थंमन्यतइतिश्रुतेः।इदमेवतत्तुरीयंशुद्धचैतन्यमज्ञानादित
दुपहितचैतन्याभ्यामविविक्तंसन्महावाक्यस्यवाच्यंविविक्तंसल्लक्ष्यमि
त्तिचोच्यते।इतियदुक्तं।तदयुक्तं।ईश्वरस्याधारभूतंत्वनूपहितंचैतन्यमि
तिवचनंमूलमनाधारंदिष्योदेवएकोनारायणः।आत्माधारोखिला
श्रयइत्यादिभिर्विरुध्येत्।वृक्षानांसमूहरूपस्यवनस्यवृक्षसत्तानंत
रसत्ताकत्वेनाव्यथान्पश्चाद्देकोहंबहुस्यामनेनजीवेनानुप्रविश्य
नामरूपेव्याकरणवाणीतिसंकल्पपूर्वकंबहुभवनंजीवभावापत्ति ॥१२॥
श्चनसंभवति।ननुसमष्टिपूर्वत्वाद्व्यष्टेः।नासंभवेतिचेन्नव्यष्टीनां
पिजीवसत्तानंतरसत्ताकत्वादायैत्वकालेभावस्यानं२

नानां

प्रतिभासमानानांजीवगतानामज्ञानानंसमष्ट्यभिप्रायेणतदेकत्वव्यप
देशः।इयंसमष्टिरुत्कृष्टोपाधितयाविशुद्धसत्वप्रधानाएतदुपहितं
चैतन्यंसर्वेश्वरत्वसर्वनियंतृत्वादिगुणकं।अंतर्यामीजगत्कारणमीश्व
रइतिव्यपदिश्यते।सकलाज्ञानावभासकत्वात्।यःसर्वज्ञःसर्ववित्।अ
स्येयंसमष्टिरखिलकारणत्वात्कारणशरीरमानंदप्रचुरत्वात्।कोशवदा
च्छादकत्वाच्चानंदमयोकोशः।सर्वोपरमत्वात्सुषुप्तिः।अतएवस्थूलसूक्ष्म
प्रपंचलयस्थानमितिचोच्यते।यथावनस्यव्यष्ट्यभिप्रायेणवृक्षाइत्यने
कत्वव्यपदेशः।तथाज्ञानस्यव्यष्ट्यभिप्रायेण।तदनेकत्वव्यपदेशः।इ
न्द्रोमायाभिः।पुरुरूपईयते।यंव्यष्टिर्निकृष्टोपाधितयामलिनसत्वप्रधाना
एतदुपहितंचैतन्यंअल्पज्ञत्वादिगुणकंप्राज्ञइत्युच्यते।एकाज्ञाना
वभासकत्वात्।अनयोःसमष्टिव्यष्ट्योर्वनवृक्षयोरिवाभेदः।एतदुप

क्षेत्रज्ञानसंतिकुतः। अविभागश्रवणात्सदेवसोम्येदमग्रआसीदिति। अ
तस्तदानींतदभावात्तत्कर्मनविद्यते। कथंतदेवपक्षंसृष्टेर्वैषम्यमिसुच्च
नइतिचेन्नानादित्वात्। क्षेत्रज्ञानांतत्कर्मप्रवाहानांचतदनादित्वेप्य
विभागउपपद्यतेचयतस्तत्। क्षेत्रज्ञवस्तुतदानीपरित्यक्तनामरूपंब्र
ह्मशरीरंतयापिपृथग्व्यपदेशानार्हमतिसूक्ष्मंतथानुभ्युपगमेत्र
कृतागमकृतप्रनाशप्रसंगश्चउपलभ्यतेचतेषांमनादित्वनजायते
म्रियतेवाविपश्चिदितिसृष्टिप्रवाहानादित्वंसूर्याचंद्रमसौधातायथा
पूर्वमकल्पयदित्यादौतद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यांव्याक्रि
यतेतिनामरूपव्याकरणमात्रश्रवणात्क्षेत्रज्ञानांस्वरूपानादित्वंसि
द्धंस्मृतावपि। प्रकृतिंपुरुषंचैवविद्ध्यनादीउभावपीति। सर्वभूतानि ॥२३॥
कौन्तेयप्रकृतिंयान्तिमामिकां। ननुघटेभिन्नेयथाकाशः। आकाशः

11

समूहावस्थाया एवसमष्टिरिति म्रियन्ते सेनारणादिषु तथादृष्टेः। किं
च समष्ट्यवस्थायां जीवास्तिष्ठन्ति न वा तिष्ठन्ति चेत् । जीवभावापत्ति
संकल्पवै[illegible]यर्थं तदवस्थं न तिष्ठन्तीति पक्षेऽपि न कथंचिदुपपद्यते न
जायते म्रियते वा विपश्चिदित्यादिना ज्ञत्वादिति श्रुतेः । जीवानां प्राची
नकर्मफलभोगाय जगत्स्रष्टुरभ्युपगमाच्च । अन्यथा विषमसृष्टेरनुप
पत्तेश्च तथा च सूत्रं वैषम्यनैर्घृण्ये न सापेक्षत्वात् । सृज्यमानादेवा
दिक्षेत्रकर्मसापेक्षत्वाद्विषमसृष्टेः देवादीनां देवादियोगं तत्तत्क
र्मसापेक्षं दर्शयति श्रुतिः साधुकारी साधुर्भवति । पापकारी पापो
भवति । पुण्यः पुण्येन कर्मणा भवति पापं पापेन कर्मणा । न कर्मावि
भागादिति चेन्नानादित्वादुपपद्यते । चाप्युपलभ्यते च । प्राक्सृष्टेः

॥वे॰त॰॥ व्यगुणको महावकाशप्रदोऽप्याकाशः। घटाकारावस्थायांअल्पावकाश
॥१४॥ प्रदत्वेन वर्त्तमानः। घटदोषासंस्पृष्टोऽवतिष्ठते घटे भिन्ने तु यथा पुराकाशः
स्यान्महावकाशप्रदः स्यात् तथा स्वभावतः स्वस्वसंकल्पादिगुणकः अ
संसारी जीवः। संसारदशायां अल्पज्ञोनीशः तथापि जन्ममरणादिदेहा
दिधर्मैः वर्जितः अवतिष्ठते देहे मृते स्थूलसूक्ष्मोपाधिनिवृत्तौ पुनः ब्रह्म
संपद्यते संपद्याविर्भावः स्वेन शब्दादिस्माद्यनुसारादाविर्भूतगुणाष्टकः
22 बृहत्वादिगुणविशिष्टो भवति ब्रह्मणः महिमानमवाप्नोति सत्वानंत्साय
ति कल्पते। नन्वनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीत्या
दिश्रुतिर्ब्रह्मण एव जीवभावापत्तिः श्रूयते। तत्रेदं विमर्षनीयं संकल्प ॥१५॥
पूर्वकजीवभावापत्तिः। किं निर्विशेषस्य उत मायोपाधिकस्य ईश्वर

स्याद्यथापुराएवं देहेमृतेजीवोब्रह्मसंपद्यते। पुनः। इत्यादिना घटाकाश
दृष्टांतेन ब्रह्मणोजीवभावापत्तिः। गम्यत इतिचेत्। आकाशदृष्टांतेतदुप
हितांशाभेदपक्षस्तु घटाकाशन्यायेन पूर्वपूर्वोपहितांशापरिगतेनुत्त
रत्तदंशारूपस्यभोक्तुरभावादुत्तरोत्तरोपहितांशानांपूर्वपूर्वांशानभूत
भोगप्रतिसंधानानुपपत्तेः। उपलभ्यमानक्षेत्रज्ञपूर्वानुभूतभोगप्रति
संधानविरुद्धः भोक्तृसंतत्येकतान्मात्रेणप्रतिसंधानेसौगतमतोन्म
ज्जने। न स्थिरात्मपरित्यागप्रसंगाच्चात्मसंतानुपपन्नः। अकृताभ्यागम
कृतविप्रनाश। प्रसंगश्च मोक्षानुपपत्तिश्च तथाहि स्थिरात्मनिउपाधी
नांसदैवदासर्वत्रगमनागमनेनविनष्टोपाधिप्रदेशेपितुपाध्यंतरसंचा
रस्यावर्जनीयत्वादुपाधेरेवमोक्षेः नत्वात्मनः। श्लोकार्थस्तु यथाश

23

पत्तिः पुनः तदवस्थास्थितिरेव तस्य तस्य मोक्षः। तर्हि ईश्वरस्य जीवभा
वापत्तौ पुनरीश्वरत्वापत्तिरेव मोक्षः। तथासति निर्गुणमोक्षवादः न
संगच्छते। तथा च सूत्रं। इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ज
गतो ब्रह्मानन्यत्वं प्रतिपादयद्भिस्तत्त्वमस्ययमात्मा ब्रह्मेत्यादिभिर्जी
वस्यापि ब्रह्मानन्यत्वं व्यपदिश्यत इत्युक्तं। तत्रेदं चोद्यते यदीतरस्य
जीवस्य ब्रह्मभावोऽमीभिर्वाक्यैर्व्यपदिश्यते। तदा ब्रह्मणः सर्वज्ञस
त्यसंकल्पत्वादियुक्तस्यात्मनो हितरूपजगदकरणमहितरूपजग
त्करणमित्यादयो दोषाः प्रसज्येरन्। आध्यात्मिकाधिदैविकानंतदुः
खाकरं चेदं जगत्। न चेदृशे स्वानर्थे स्वाधीनो बुद्धिमान् प्रवर्त्तते ॥२५॥
जीवाद्ब्रह्मणो भेदवादिन्यः श्रुतयः जगद्ब्रह्मणोरनन्यत्वं वदतान्व

स्य न चाद्यं निर्विशेषस्य संकल्पशून्यत्वात् न द्वितीयः । विशुद्धसत्वप्रधा
नोपाधिकस्य मलिनसत्वोपाधिकस्यामिति संकल्पोपि न युज्यते नत्वनु
यति न्मत्तः । स्वस्यानर्थसंकल्पे ईश्वरः । स्वोपाधिपरित्यागेनान्यथाभवनेप त
टीश्वरः । तर्हि निर्विशेष एव किं न स्यात् । न च विद्योपाधिविशिष्टस्येवा
विद्योपाधिकत्वं संभवति विद्याविद्ययोः सांकार्यप्रसंगात् । किंच अंतः
प्रविष्टः शास्ता जनानां सर्वात्मा इत्यनेन स्वस्य स्वयमेवात्मा शास्ता च त्र
ग्निं रात्मानं दहतीति वदसंगतानुपपन्नः । अथ च र[illegible]एवासाधु कर्मका ल
रयति । तं यमधो निनीषति इति सर्वज्ञोपि जीवभूतस्य स्वस्य नरकानुभ
वहेतुभूतासाधुकर्मकारयिता पापकर्मसु निवर्त्तने शक्तोपि नियंते
ति सर्वमसमंजसमेव स्यात् । किंच मुक्तिर्हि त्वान्यथारूपं स्वरूपेण व्य
वस्थितिरित्यनुमारेणाद्यावस्था व स्वस्य संकल्प एव कजीवभा

॥वे. न.॥ रीसंडयते। अजो नित्यः शाश्वतोयमात्मा प्यनीशः। अनीशया शोचति मुह्य
॥२६॥ मान इत्यादिश्रुतेः जीवतत्वे देहात्मभ्रमं स्वतंत्रात्मभ्रमं चोत्पादयति तेन दे
होहमीश्वरोहमहंभोगीति विकारो भवति। तथापि तं विश्वस्यात्मा ईश्वरं शाश्व
24 तं शिवमच्युतं यो मामजमनादिं च। आत्माधारोखिलाश्रय ईश्वरतत्वे कार्ये
त्वान्याधारत्वमायोपाधिकत्वबुद्धिं जनयति। तथा च गीयते अव्यक्तं व्यक्तिमा
पन्नं अवजानंति परं भावमजानंतो नन्वाभासः। प्रतिबिंबार्थप्रसिद्धः स एवान्ता
गीकार्यः हंत तर्हि। असदेवेदमग्र आसीत्‌ वीरहा विषमः शून्यः। इत्यत्रासत्
शून्यशब्दाभ्यां प्रसिद्धोर्थो नश्शून्यमेव तत्वमिति विज्ञायते। कुतो नांगीक्रियते
तदनंगीकारे यत्कारणं सोत्रापि समानं। नन्वयं जीवः यदि भिन्नः। तर्हि कथं तत्व
मस्यादिवाक्यैरेकत्वव्यपदेशः इत्यत्र। अंशो नानाव्यपदेशादन्यथा चापि दास ॥२६॥
कितवादित्वमधीयत एके। ब्रह्मांशो जीवः कुतः। नानाव्यपदेशादन्यथा चै

येवपरित्यक्ताः। भेदेसत्वनस्वत्वासिद्धिः। औपाधिकभेदविषयाभेदश्रुतयः स्वाभा
विकाभेदविषयाश्चाभेदश्रुतयः। इतिचेन्नेदंवक्तव्यं। स्वभावतः स्वस्मादभिन्नं
जीवंकिंजगत्कारणंब्रह्मजानातिनवानजानातिचेत्। सर्वज्ञत्वहानिः जानातिचे
त् स्वस्मादभिन्नस्यजीवस्यदुःखंस्वदुःखमितिजानतोब्रह्मणोहिताकरणाहि
तकरणादिदोषप्रसक्तिरनिवार्या। ननुमायाभासेनजीवेशौकरोति। इतिजीवेश्व
रयोः ब्रह्मप्रतिबिंबं इतिवक्तुंनशक्यते श्रुतिविरुद्धत्वात्। सकारणंकरणाधिपाधि
पः। नचास्यकश्चिज्जनितानचाधिपः। नजायतेम्रियतेवाविपश्चित्। नित्यानांजीवा
नांकर्मणाकलेवरप्रदानश्रवणविरोधोपि। तथाचवेदस्तुतो। बुद्धींद्रियमनः
प्राणान्जनानामसृजत्प्रभुः। मात्रार्थंचभवार्थंच। आत्मनेकल्पनायच श्रुत
यस्तु। मायाआभासेनअयाथात्म्येनजीवेशौकरोतिउभयोः। तत्त्ववैपरीत्यं
जनयतिउच्यतेतिउक्तार्थेआभासप्रयोगः हेत्वाभासः। धर्माभासः किंतद्वैप
त्वं अपते बुद्धि प्रतिबिंबतो जीव मायाभासो ईश्वर इति चेत्

निर्विशेषउपरक्तचिन्मात्रस्य ब्रह्मणः प्रतिबिंब

॥वे॰त॰॥ जगत्सृष्ट्यादिवादीनां प्रमाणांतरं सिद्धभेदानुवादेन मिथ्यार्थोपदेशपरत्वं।

॥७॥ अपिस्मर्यते ममैवांशो जीवलोके जीवभूतः सनातनः मद्विभूतिभूतो मदंश

रावस्वभावतः। सत्यसंकल्पादिगुणकः स कश्चिदनादिकर्मरूपाविद्यावेष्टन

तिरोहितश्चस्वरूपो जीवभूतोऽतिसंकुचितज्ञानैश्वर्यजीवलोकेसंसारिवर्त्त

मानः। तथाचश्रुतिः। तेइमेसत्याःकामाः अनृतापिधानाः। जीवानां कर्मप्रवाहा

नादित्वं च। नकर्माविभागादितिचेन्नानादित्वादुपपद्यतेचाप्युपलभ्यतेच इ

तिसूत्रादवसेयं स्मृतिश्च। अनादिकालसंसुप्तसंसारपदवीगतः नन्वेक

वस्त्वेकदेशवाचीह्यंशशब्दः। जीवस्यब्रह्मैकदेशत्वेनतद्गता दोषाः ब्रह्म

ण्यभवेयुः नचब्रह्मखंडोजीवः। इसंशत्वोपपत्तिः खंडनर्हत्वाद्ब्रह्मणः इ

त्यत्रप्रकाशादिवच्चनैवंपरः। तच्छब्दश्चोद्यं व्यावर्त्तयति प्रकाशादिवज्जी ॥७॥

वः परमात्मनोंशः यथाग्न्यादित्यादिर्भास्वतोभारूपप्रकाशोंशो भवति

75

कत्वेन व्यपदेशात् उभययथा हि व्यपदेशाद्दृश्यन्ते नानाव्यपदेशास्तावत्स्रष्टृत्व
स्रजत्वनियन्तृत्वनियाम्यत्वसर्वज्ञत्वाज्ञत्वस्वाधीनत्वपराधीनत्वशुद्धत्वाशु
द्धत्वकल्याणगुणाकरत्वविपरीतत्वपतित्वशेषित्वादिभिर्दृश्यन्ते। अन्यथा
भेदेन व्यपदेशोपि तत्त्वमस्ययमात्माब्रह्मेत्यादिभिर्दृश्यन्ते। अपि दासकितवादि
त्वमप्यधीयत एके। ब्रह्मदासाः। ब्रह्मदासाब्रह्मेमे कितवा इत्याथर्वणिकाः। ब्र
ह्मणो दासकितवादित्वमप्यधीयते। ततश्च जीवव्यापित्वेनाभेदो व्यपदिश्य
त इत्यर्थः। एवमुभयव्यपदेशामुख्यत्वसिद्ध्ये। जीवोयं ब्रह्मणोंश इत्यभ्युपगंत
व्यः। न च भेदव्यपदेशानां प्रत्यक्षादिप्रसिद्धार्थत्वेनान्यथासिद्धत्वं ब्रह्मस्रज
त्वतन्नियाम्यत्वतच्छरीरत्वतच्छेषत्वतदाधारत्वात्तत्साम्यत्वतत्संहार्यत्व
तदुपासकत्वतत्प्रसादलभ्यधर्मार्थकाममोक्षरूपपुरुषार्थभोक्तृत्वादयः।
तत्कृतश्च जीवब्रह्मणोर्भेदः प्रत्यक्षाद्यगोचरत्वेनानन्यथासिद्धः। अतो

॥वे॰त॰॥ मर्थः।प्रागेवप्रपंचितः।ननुसत्तासोम्यतदासंपन्नःभवतिस्वमपीतोभवति।इ
॥१८॥ तिजीवपरयोःस्वरूपैक्यंश्रूयतेतिचेत्।प्राज्ञेनात्मनासंपरिष्वक्तोनवाह्यंकिं
चनवेदनांतरमितिस्वापदशायांजीवस्यसर्वज्ञेनपरमात्मनानिरस्तसमस्त
श्रमस्यवाह्याभ्यंतरज्ञानलोपःश्रूयते।नह्यकिंचिज्ञस्तदानीमेवसर्वज्ञेन
सत्तास्वेनपरिष्वंगःसंभवतिसत्तासोम्येसत्रापिनजीवपरयोःस्वरूपैक्यमुच्य
76 ते।अपितुस्वसुषुप्तिकालेषुनामरूपानुसंधानाभावात्।प्रलयकालइवब्रह्म
णिलयप्रतिपाद्यतेस्वमपीतोभवतिस्वात्मनिब्रह्मण्येलीनोभवतिनतुस्व
स्मिन्नेवस्वस्यलयःसंभवतिअत्रापिसत्तासोम्यतदासंपन्नोभवतीतित्वती
यास्वारस्यात्संपत्तिसद्वस्यपरिष्वंगशब्दैकार्थ्यान्नस्वरूपैक्यसंभवः।त का
थाचसूत्रकारःसुषुप्त्युत्क्रांत्योर्भेदेनेति।अथप्रतिबिंबवादोविलिख्यते।ननु ॥१८॥
गुहांप्रविष्टौपरमेपरार्द्धेछायातपौब्रह्मविदोवदंति।इतिश्रुत्याजीवस्य

यथा गवाश्वशुक्लाः। कृष्णादीनां गोत्वादिविशिष्टानां गोत्वादिनिर्विशेषणांश-
शाः। यथा वा देहिनो देवमनुष्यादेर्देहांशस्तद्वत्। एकवस्त्वेकदेशत्वं ह्यंश
त्वं विशिष्टस्यैकवस्तुनो विशेषणांशोऽयं विशेष्यांशोऽयमिति व्यपदिशन्ति
विशेषणविशेष्ययोरंशांशित्वेपि स्वभाववैलक्षण्यं दृश्यते। एवं जीवपरयो
र्विशेषणविशेष्ययोरंशांशित्वं स्वभावभेदश्चोपपद्यते तदिदमुच्यते नैवं प
र इति यथाभूतो जीवस्तथाभूतो न परः। यथैव हि प्रभायाः प्रभावानन्यथाभू
तः। तथा प्रभास्थानीयत्वादंशाज्जीवादंशी परोप्यर्थान्तरभूत इत्यर्थः। एवं जी
वपरयोर्विशेषणविशेष्यत्वकृतं स्वभाववैलक्षण्यमाश्रित्य भेदनिर्देशाः प्र
वर्त्तन्ते। अभेदनिर्देशास्तु पृथक्सिद्ध्यनर्हविशेषणानां विशेष्यपर्यन्तत्वमाश्रि
त्य मुख्यत्वेनोपपद्यन्ते। तत्त्वमस्ययमात्मा ब्रह्मेत्यादिषु तच्छब्दब्रह्मशब्दवत्
त्वमयमात्मेति शब्दोपि जीवशरीरकब्रह्मवाचकत्वेनैकार्थाभिधायित्वादय

॥वे॰त॰॥
॥१९॥

केदारजलाभिव्यक्तीनां चंद्रप्रतिबिंबानामिव मायाहंकारतद्विकाराभिव्यक्तब्र
ह्मछायानां ईश्वरजीववृत्तिज्ञानानामौपाधिकभेदवत्त्वेन तं निबंधनोयं ज्ञा
ज्ञौ इति चेन्न परिछिन्नव्योमादिविलक्षणवस्तुनः छायासंपत्त्यसंभवात् अ
सो हि तय छायश्रवणाच्च कल्पनीकत्वायं गीकारे जीवेश्वरयोरपि मिथ्यात्वप्रसं
गात् तदभ्युगमे आत्मा वा रे दृष्टव्यः श्रोतव्यः यः एतद्विदुरमृतास्ते भवंतीत्यादिवि
धिनामानर्थक्यप्रसंगात् तस्याप्यभ्युपगमे ब्रह्मणो मानांतराविषयत्वात् स्वा
नुभवस्यापि मिथ्याभूतजीवानतिरिक्तावभासकत्वाच्च यावत्प्रमाणप्रमेयमि
थ्यात्ववादिनः कथायामधिकारानुपपत्तेः जलचंद्रदृष्टांतोपदेशानां ब्रह्मणः
शरीरभृत्तविदविकृतदोषायेत्यशब्दप्रतिपादनपरत्वोपपत्तेः वाक्यांतरोप
दिष्टजीवेश्वरस्वरूपस्वभावयाथार्थ्यविधस्पर्शकत्वाभावात् श्रूयते
च अंतर्यामीति निर्दोषत्वं एको देवः सर्वभूतेषु गूढः अग्निर्यथैको भुवनं

27

थे
॥१९॥

ब्रह्मप्रतिबिंब[illegible]त्वं प्रतिपाद्यते। इति चेन्न एवं देहावस्थितत्वेन जीवात्म
परमात्मनोरभास्वरभास्वरयोः छायातपयोरिवाप्रकाशस्वप्रकाशत्वस्वरूप
स्वभावमवस्थामात्रप्रतिपादनपरत्वात्। द्वासुपर्णा सयुजा सखाया समा
नं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति
श्रुत्यंतरैकार्थ्यात्। अत्रापि ब्रह्मणः आतपत्वाभावादातपवद्भास्वरत्वमेवा
तपशब्दार्थ इति जीवस्य छायाभावेपि छायावदच्छदशायामभास्वरत्वमे
व छायामेव छायाशब्दार्थो भवितुमर्हति। अस्थूलमनण्वह्रस्वमदीर्घम
लोहितमच्छायमिति छायाप्रतिषेधश्रवणाच्च नात्र छायाशब्दो ब्रह्मप्र
प्र तिबिंबपरः न त्वेक। एवं हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव
दृश्यते जलचंद्रवत्। आकाशमेकं हि यथा घटादिषु पृथग्भवेत्तथात्मे
को ह्यनेकस्थो जलाधारेष्विवांशुमान्। इत्यादिशास्त्रानुसारेण तडागकूल

नात्वनिषिधाश्च तदभिप्रायमेवेदं भगवद्वचनं । विद्याविनयसंपन्नइत्या
दिनिर्दोषंहिसमंचप्रकृतिसंसर्गदोषविमुक्ततयासममात्मवस्तुहिब्रह्मस
र्वभूतेशः सोसौब्रह्मचारिणोग्र्यं विष्णुः । वाराहे । यत्सत्वंसहरिर्देवोयोहरि
स्तत्परंपदं । सत्वेनमुच्यतेजंतुं सत्वंनारायणात्मकं । लैंगे । सत्वस्वरूपश्च
सर्वज्ञः स्वयंविष्णुः पुरुषोत्तमः नहिपालनसामर्थ्यमृतेसर्वेश्वरं हरिं इत्यादिभिः
प्रामाणिकानांचेतनांतरसंकानोपपद्यते । ब्रह्माणमिंद्रं रुद्रंच यमंवरुणं लद्वंन
18 मेवच निगृह्यहरते यस्मात्तस्माद्धरिरिहोच्यते । नारायणस्यतु । अथ एकोह
वैनारायणआसीत् । अथनित्योहवैनारायणः । एषसर्वभूतांतरात्मा ॥
अपहतपाप्मादिव्योदेवएकोनारायणः । परंब्रह्म आत्मानारायणःपर॰ नाराय
सुबालोपनिषदि किंतदासीन्नैवेह किंचनाग्रआसीत् अमूलमनाधारंइ

रू,पं प्रविष्टो रूपं प्रतिरूपो वभूव। एकस्तथा सर्वभूतांतरात्मा रूपं रूपं प्र
तिरूपो वहिश्च। सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्वाह्यदोषैः
एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन वाह्यः। अन्यथात्माका
शमेकं हि यथा घटादिषु पृथग्भवेदिति दृष्टांतरोपादानवैयर्थ्यप्रसंगात्
ननु सितनीलादिभेदेन यथैकं दृश्यते नभः। भ्रांतिदृष्टिभिरात्मापि तथैवैकः स्म ६
पृथक्पृथक् इत्यादात्मैकत्ववादः कथं। अवैदोक्ष्यत्पादिति ब्रूमः भेदरूपा लद
द्वाहि वैलक्षण्यवचनो लोके प्रसिद्धः सुसदृशेषु नास्य कस्यचिद्भेदोस्ती
ति वक्तारो भवंति तथात्मानामपि नरपशुतिर्यगादिभिन्नशरीरवर्तिनां श
रीरसंबंधमयो ह्यत्र केवल तत्वरूपेण निरूप्यमाणानां पुष्परजः परमाणुना
मिव न किंचिदपि वैलक्षण्यमस्तीति। अनेनाभिप्रायेणैकत्ववादः। ना

||वे॰त|| कारापत्त्याद्ब्रह्मणि वृत्तिः। प्रतिपाद्यते न स्वरूपनिवृत्ति। अक्षरं तमसि लीयते
||२५|| तमः परे देवे एकीभवतीति तमःशब्दवाच्यायाः प्रकृतेः परमात्मन्येकीभावश्च व
णात्तत्पृथग्ग्रहणरहितत्वेन वृत्तिरेकीभावः स एव लयशब्दार्थः। यथा वृक्षे
लीना पतंगा वने लीना सारंगाः। अत एव तमसा गूढमग्रे प्रकेतमासीत्॥
अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः। इति सूक्ष्म
29 रूपेणान्वीश्वरस्यान्तःप्रविष्टः शास्ता जनानां सर्वात्मा। इत्यनेन स्वस्वस्वय
मेवात्मा शास्ता च। अग्निरात्मानं दहतीतिवत् अत्यंतानुपपत्तेः अथ च ए
ष्ह्येवासाधुकर्म कारयति यं तमधो निनीषति। इति सर्वज्ञोपि जीवभूत
स्य स्वस्य नरकानुभवहेतुभूतासाधुकर्मकारयिता पापकर्मसु निवर्त्तन
शक्तोपि नियंतादिकं सर्वमसमंजस्यमेव स्यात्। आह च सूत्रकारः इत ||२१||

इमाः प्रजाः। दिव्यो देव एको नारायणः। श्वेताश्वतरे स विश्वकृद्विश्वविदा
त्मयोनिर्ज्ञः। कालकालो गुणी सर्वविद्यः। प्रधानक्षेत्रज्ञपतिर्गुणेशः संसा
रमोक्षस्थितिबंधहेतुः देशतः कालतो व्याप्तिः मोक्षदत्वं तथैव च। हरेर्विभू
तिमात्रं तु कैवल्यं संप्रभाषितं स्कांदे। बंधको भवपाशेन भवपाशाच्च मो
चकः। कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः। इत्यादिभिः निखिलहेयप्र
त्यनीकत्वं कल्याणगुणाकरत्वं श्रवगम्यते स ब्रह्मात्मशिवादिशब्दाहितुल्य
प्रकरणस्थेन नारायणशब्देन विशेषतास्तमेवागमयंति ननु आत्मा वा इ
दमग्र आसीदिति प्राक्सृष्टेरेकत्वावधारणात्कथं सूक्ष्मचिदचिद्विशिष्ट
स्य नारायणस्य कारणत्वमुच्यते। यतो वा इमानि भूतानि जायंते येन जाता
नि जीवंति यत्प्रयंत्यभिसंविशंति इति परित्यक्तस्थूलाकाराणां सूक्ष्मा

॥वे॰त॰॥
॥२२॥
२०

जीवब्रह्मणोरज्ञानकृतोभेदस्तद्विषयाभेदश्रुतिरितिचेत्तत्रापिजीवा
ज्ञानपक्षेपूर्वोक्तोविकल्पस्तत्फलंचतदवस्थंब्रह्माज्ञानपक्षेस्वप्रका
शस्वरूपब्रह्मणोज्ञानसाक्षित्वंतत्कृतजगत्सृष्टिश्चनसंभवति।
अज्ञानेनप्रकाशस्तिरोहितश्चेत्।तिरोधानस्यप्रकाशनिवृत्तिकरत्वेन
प्रकाशस्यैवरूपत्वात्।स्वरूपनिवृत्तिरेवेतिस्वरूपनाशादिदोषस
त्त्वंप्रागेवोदिरीतं।अधिकंतुभेदनिर्देशात्।तुशब्दःपक्षंव्यावर्तयति।आ
ध्यात्मिकादिदुःखयोगार्हात्।प्रत्यगात्मनोऽधिकमर्थांतरभूतंब्र
ह्मकुतः।भेदनिर्देशात्।प्रत्यगात्मनोहिभेदेननिर्दिश्यतेपरंब्रह्मय
आत्मनितिष्ठन्नात्मनोंतरोयमात्मानवेदयस्यात्माशरीरंयआत्मा ॥२२॥
नमंतरोयमयतिसतआत्मांतर्याम्यमृतःपृथगात्मानंप्रेरितारंचम

रव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः जगतो ब्रह्मानन्यत्वं प्रतिपाद
यद्भिस्तत्त्वमस्ययमात्मा ब्रह्मेत्यादिभिर्जीवस्यापि। ब्रह्मानन्यत्वं व्यपदिश्य
त इत्युक्तं। तत्रेदं चोद्यते यदीतरस्य ब्रह्मस्वभावोऽमीभिर्वाक्यैर्व्यपदिश्यते। तदा
ब्रह्मणः सार्वज्ञस्य सत्यसंकल्पत्वादियुक्तस्यात्मनो हितरूपजगदकरणम
हितरूपजगत्करणमित्यादयो दोषाः प्रसज्येरन्। आध्यात्मिकाधिभौतिका
धिदैविकानामनंतदुःखाकरं चेदं जगत्। न चेदृशे स्वानर्थे स्वाधीनो बु
द्धिमान् प्रवर्त्तते जीवाद्ब्रह्मणो भेदवादिन्यः श्रुतयः इति चेत्तत्रेदं वक्तव्यं
स्वभावतः स्वस्माद्भिन्नं जीवं किमनुपहितं जगत्कारणं ब्रह्म जानाति न वा
न जानाति चेत्। सर्वज्ञत्वहानि जानाति चेत् स्वस्मादभिन्नस्य दुःखं स्वदुः
खमिति जानतो ब्रह्मणो हिताकरणाहितकरणादिदोषप्रसक्तिरनिवार्या

॥वे.त.॥ वतीत्यत्रापिनजीवपरयोःस्वरूपैक्यमुच्यते। अपितुसुषुप्तिकालेनामरू
॥२३॥ पानुसंधानाभावात्प्रलयकालइवब्रह्मणिलयःप्रतिपाद्यते। स्वमपीतो
भवतिस्वात्मनिब्रह्मणिलीनोभवति। ननुस्वस्मिन्नेवस्वस्यलयःसं
भवति। तत्रापिसतासोम्यतदासंपन्नोभवतीतितृतीयाश्रवणात्स्यात्। संप
त्तिशब्दःपरिष्वंगशब्दैकार्थ्यात्स्वरूपैक्यसंभवः। तथाचसूत्रकारःसु
21 षुप्त्युत्क्रान्त्योर्भेदेनेति। तथाचविवक्षितगुणोपपत्तेश्च। अनुपपत्तेस्तुन
शारीरः। इतिवक्ष्यमाणाश्चगुणाःपरमात्मन्येवोपपद्यंते। मनोमयःप्राण
शरीरोभारूपःसत्यसंकल्पः। आकाशात्मासर्वकर्मासर्वकामःसर्वगं
धःसर्वरसः। सर्वमिदमभ्यात्तोवाक्यनादरइति। ननुसक्रतुंकुर्वीतेतिविहि
नच्चै तमुपासनं। नैवायंगुणविधिः। असत्त्वाच्चगुणेनोपासनेविहितार्थेस्यात् ॥२३॥ मं
मं मनोब्रह्मेत्युपासीतेतिवत्। अन्यथाशब्दमस्पर्शमित्यादिनिर्गुणवा

त्वाज्ञ एस्तत्तस्तेनामृतत्वमेति ज्ञाकारणं करणाधिपाधिपः तयोरन्यः
पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति । ज्ञाज्ञौ द्वावजावीशानीशौ ।
अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः प्रधा
नक्षेत्रज्ञपतिर्गुणेशः नित्यो नित्यानां योऽक्षरमंतरे संचरन् यस्याक्षरं
शरीरं यमक्षरं न वेद एष सर्वभूतांतरात्मापहतपाप्मा दिव्यो देव
एको नारायण इत्याद्याः । तथा सुषुप्तावपि जीवपरयोर्भेदः । प्राज्ञेना
त्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमिति स्वापदशायां जी
वस्य सर्वज्ञेन परमात्मना निरस्तसमस्तज्ञमस्य बाह्याभ्यंतरज्ञा
नलोपः । श्रूयते न हि तत्र किंचिज्ज्ञस्तदानीमेव सर्वज्ञेन सतात्स्वेन
परिष्वंगः । संभवति सत्ता सोम्य तदा संपन्नो भवति स्वमपीतो भ

२२

धसर्वेरसः इतियावद्ग्रंथरसचिधिः नचैकस्मिन् वस्तुनिर्गुणतदभावावुपपन्ना
ति तस्माद्विषयभेदवर्णनेनहि विरोधपरिहारः कार्यः सचकार्यब्रह्मणिमनो
मयत्वादिः शुद्धेतु अशब्दत्वादिरितिचेन्न विश्वमेवेदं पुरुषस्तद्विश्वमुपजी
वतिपतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं यमंतः समुद्रे कवयोवदंति
नतस्येशे कश्चन तस्य नाम महद्यशः परात्परं यन्महतो महांतं नतत्समश्चा
भ्यधिकश्च दृश्यते नत्वत्समोस्त्याभ्यधिकः कुतोन्यः परं हि पुंडरीकाक्षान्नभू
तो नभविष्यति वाराहे नारायणात्परो देवो नभूतो नभविष्यति ब्रह्मेनहि वि
ष्णुसमा काचिद्गतिरन्याभिधीयते इत्येवं सततं वेदाः गायंते नात्र संशयः
श्वेताश्वेतरे स विश्वकृद्विश्वविदात्मयोनिः ज्ञः कालकालो गुणी सर्वविद्यः प्र
धान क्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबंधहेतुः एको देवः सर्वभूतेषु ॥२४॥
गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षिचेता

क्व विरोधः। अतो मनोमयत्वादयः न पारमार्थिका इति चेन्नैवं सर्वत्र प्रसिद्धो
पदेशोऽस्त्यत्र विरोधात्। सर्वेषु वेदांतेषु प्रसिद्धं ब्रह्म इह च सर्वं खल्विदं ब्रह्म
तज्जलानिति शांत उपासीत। इति वाक्योपक्रमे श्रुतं तदेव मनोमयत्वादिभिः धर्मै
र्विशिष्टमुपदिश्यत इत्यर्थः। न हि सर्वेषु वेदांतेषु कल्पित गुणोपदेशाद्धेतुर्वक्तुं
शक्यते साध्यासिद्धिप्रसंगात्। न च सर्वं खल्विदं ब्रह्मेति वचनमेवाभाववक्त्रा
पनार्थे इति वाच्यं तज्जलानिति हेतुर्विरोधात्। किंच यदि सर्वं खल्विदं ब्रह्मे
ति वचनमेवाभावज्ञानान्मिथ्यात्वविधिस्तर्हि पुनः स क्रतुं कुर्वीतेति सगुणोपास
नविधिरनर्थकं स्यात्। नहि निर्विशेषज्ञानवतः सगुणोपासनविधिरिति सं
गतं भवति। अशब्दमस्पर्शमित्यादि श्रुतिस्तु भूतभौतिकवैलक्षण्यं ब्रह्मणः
प्रतिपादयति इति न विरोधः। सत्त्वादयो न संति ईशे यत्र च प्रकृता गुणा इति
स्मृतेः। ननु तत्र तथा रसं नित्यमगंधवच्च अगंधरसादेर्निषेध इयं तु सर्वगं

केवलो निर्गुणश्च। सगुणो निर्गुणो विभुः ज्ञानगम्यो ह्यसौ स्मृतः नहि तस्य
गुणाः सर्वे सर्वैर्मुनिगणैरपि वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैरेष आत्मा
ऽपहतपाप्मा परास्य शक्तिर्विविधैव श्रूयते। तत्त्वं नारायणः पर इत्यादिश्रु
तिस्मृतिभिः नारायणस्यैव परतत्त्वं। दिव्यकल्याणगुणयोगेन सगुणत्वं प्रा
कृतहेयगुणराहित्येन निर्गुणत्वमिति विषयव्यवस्थानेन एकस्यैवावगमात्
तद्ब्रह्मद्वैविध्यं दुर्वचनं इति दिक्॥ इति श्रीमद्रामानुजाचार्यविरचितं वेदां
तत्त्वसारं संपूर्णं संवत् १८७६
पोषकृष्ण ३० भृगुः॥

किं ब्रह्म किं तत्स्वरूपं तद्ब्रह्म ॥ यतो वा इमानि भूतानि जायंते
येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति
तद्विजिज्ञासस्व तद्ब्रह्म
इति श्रुत्या विद
चिदात्मकं प्रपंच
सत्तास्फूर्ति विना
हेतुत्वेन प्रति
पादनपरत्वेन
जगन्निमित्तोपा
दानकारणत्वमेव
ब्रह्मणो लक्षणम्
इति चेत् ॥